भवन्तीति विशेषः। घञन्तस्य जोषशब्दस्य मान्तत्वेन स्वरादिषु पाठादव्ययत्वं बोध्यम्। [A]जुष्यः इति 'एतिस्तुशास्वृदृजुषः क्यप्' (3-1-109) इति क्यपि रूपम्। क्विपि, सह जुषते इति सजूः-सजुषौ-सजुषः। 'ससजुषो रुः' (8-2-66) इति रुत्वे, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घे विसर्गः।

## (615) "जूरी हिंसावयोहान्योः"

(IV-दिवादिः-1156. सक. सेट्. आत्म.)

जोरकः-रिका, जोरकः-रिका, जुजूरिषकः-षिका, जोजूरकः-रिका; जूरिता-त्री, जूरयिता-त्री, जुजूरिषिता-त्री, जोजूरिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि गूरी (419) धातुवत् ज्ञेयानि। [1]जूर्णः[B]।

## (616) "जूष हिंसायाम्" (I-भ्वादिः-681. सक. सेट्. पर.)

[C]जूषकः-षिका, जूषकः-षिका, जुजूषिषकः-षिका, जोजूषकः-षिका; जूषिता-त्री, जूषयिता-त्री, जुजूषिषिता-त्री, जोजूषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचूषधातुवत् (552) ऊह्यानि।

## (617) "जृभि गात्रविनामे" (I-भ्वादिः- 389. सक. सेट्. आत्म.)

जृम्भकः-म्भिका, जृम्भकः-म्भिका, जिजृम्भिषकः-षिका, जरीजृम्भकः-म्भिका; जृम्भिता-त्री, जृम्भयिता-त्री, जिजृम्भिषिता-त्री, जरीजृम्भिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगृञ्जतिवत् (423) ज्ञेयानि। अस्यात्मनेपदित्वात् शानचि जृम्भमाणः, जृम्भिष्यमाणः, जृम्भयमाणः, जृम्भयिष्यमाणः, जिजृम्भिषमाणः, जिजृम्भिषिष्यमाणः इति रूपाणीति

---

1. 'श्वीदितः—' (7-2-14) इतीण्णिषेधे, 'रदाभ्याम्—' (8-2-42) इति निष्ठानत्वे णत्वे च रूपम्।

A. 'आदृत्यस्तेन वृत्येन स्तुत्यो जुष्येण सङ्गतः।' भ. का 6. 56.

B. 'गूर्णेऽस्मिन् बहुजन्तुघूरिणि खले जूर्णैः शशंसे नृभिः शौरिः शूरकगर्वचूरणपरः सन्तप्यमानः सताम्॥' धा. का. 2-60.

C. 'शूषन् दृशोरमृतयूषमजूषकस्त्वं भूषस्यनूषमतिरीषभुजां प्रियः क्ष्माम्॥' धा. का. 1.86.